O/C

# A-II/1/1405/ 22

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## नव्यन्यायः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. नीलो घटः इत्यत्र शाब्दबोधः कीदृशः भवति ?
2. 'विंशत्याद्याः सदैकत्वे' इति नियमात् कः प्रयोगः संगच्छते ?
3. व्रीहिपदोत्तरस्वार्थैकत्वस्य कुत्रान्वयः ? स्वार्थैकत्वस्य
4. जात्याकृतिव्यक्तयः कः ?
5. नीलघटः इति समासस्थले आकाङ्क्षा कीदृशी ?
6. क्रियाविशेषणे विभक्तिः का ?
7. राजविशिष्टपुरुषे वैशिष्ट्यं केन सम्बन्धेन ग्राह्यम् ?
8. ऋद्धस्य राजमातङ्गाः इत्यत्र शाब्दबोधः स्वीक्रियते न वा ?
9. राज्ञः पुरुषः इत्यत्र प्रकारतावादिमते बोधः कः ?
10. स्वरूपसम्बन्धेन ग्राह्याभावनिश्चयः विरोधी कस्य ?
11. बहुवचनस्य शक्तिः कुत्र ?

**अथवा**

प्रादयो वाचकाः द्योतकाः वा ?

12. व्याप्तिः का ?

**अथवा**

सामर्थ्यं किं ?

13. स्तोकं पचतीत्यत्र बोधः कः ?

**अथवा**

धान्येन धनवानित्यत्र तृतीयायाः कोऽर्थः ?

14. चैत्रः पचतीत्यत्र कीदृशबोधः ?

**अथवा**

विभक्तिः कतिधा ?

15. पर्याप्तौ किं मानम् ?

**अथवा**

तात्पर्यज्ञानं कुत्र कारणम् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. त्रयः समुदिताः हेतुरिति प्रयोगोपपत्तिं दर्शयत।

17. दधिसुन्दरमितिप्रयोगोपपत्तये स्वप्रकृतिकत्वं कीदृशं वाच्यमिति ? विलिख्य सङ्गमयत।

18. कर्म गच्छतीत्यत्र कथं निराकाङ्क्षत्वम् ? स्पष्टयत।

**अथवा**

सः घटः इत्यत्रान्वयबोधं गदाधरदिशा लिखत।

19. प्रातिपदिकार्थस्य प्रत्ययार्थेन समं भेदान्वयबोधं सोदाहरणं दर्शयत।

**अथवा**

राजपुरुष इत्यत्रान्वयबोधं सोपपत्तिकं विवेचयत।

20. जानातीत्यत्राख्यातनैरर्थक्यं मणिकारदिशा दर्शयत।

**अथवा**

केवलान्वयिविधेयकस्थले च द्वित्वत्वाद्यवच्छिन्नव्यापकत्वमेव संसर्गघटकमित्याशयं स्फोरयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. विशेषणविभक्त्यर्थं यथाग्रन्थं व्याख्यात।

**अथवा**

भेदान्वयबोधः विस्तरेण लेख्यः।

**अथवा**

'आकाशो न द्वौ' इत्यत्र गदाधरोक्ताशयं स्पष्टयत।